Navagrahasukta..

# ॥ नवग्रहसूक्तम् ॥

॥ गणेशवन्दना ॥

ॐ शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनम् ध्यायेत्सर्व विघ्नोपशान्तये ॥

॥ प्राणायामम् ॥

ॐ भूः । ॐ भुव॑ः । ओ॒ꣳ सुव॑ः ।
ॐ मह॑ः । ॐ जनः । ॐ तप॑ः । ओꣳ स॒त्यम् ।
ॐ तत्स॑वि॒तुर्वरे॑ण्यं॒ भर्गो॑ दे॒वस्य॑ धीमहि ।
धियो॒ यो नः॑ प्रचो॒दया॑॑त् ।
ओमापो॒ ज्योती॒रसो॒ऽमृतं॒ ब्रह्म॒ भूर्भुव॒स्सुव॒रोम् ॥

॥ संकल्पः ॥

ममोपात्तस्समस्तस्दुरितक्षयद्वारा श्रीपरमेश्वर प्रीत्यर्थं
आदित्यादि नवग्रह देवता प्रसाद सिद्ध्यर्तं आदित्यादि
नवग्रह नमस्कारान् करिष्ये ॥

॥ मन्त्राणि ॥

ॐ आस॒त्येन॒ रज॑सा॒ वर्त॑मानो निवे॒शय॑न्न॒मृतं॒ मर्त्यं॑ च ।
हि॒रण्मये॑न सवि॒ता र॒थेनाऽऽदेवो या॑ति॒ भुव॑ना वि॒पश्यन्॑ ।
अ॒ग्निं दू॒तं वृ॑णीमहे॒ होता॑रं वि॒श्ववे॑दसम् ।
अ॒स्य य॒ज्ञस्य॑ सु॒क्रतुम्॑ ॥
येषा॒मीशे॑ पशु॒पति॑ः पशू॒नां चतु॑ष्पदामु॒त च॑ द्वि॒पदा॑म् ।
निष्क्री॑तो॒ऽयं य॒ज्ञियं॑ भा॒गमे॑तु रा॒यस्पोषा॒ यज॑मानस्य सन्तु ॥
ॐ अधिदेवता प्रत्यधिदेवता सहिताय आदि॑त्याय॒ नम॑ः ॥ १ ॥

ॐ आप्या॑यस्व॒ समे॑तु ते वि॒श्वत॑स्सोम॒ वृष्णि॑यम् ।
भवा॒ वाज॑स्य संग॒थे ॥
अ॒प्सुमे॒ सोमो॑ अब्रवीद॒न्तर्विश्वा॑नि भेष॒जा ।
अ॒ग्निञ्च॑ वि॒श्वश॑ंभुव॒माप॑श्च वि॒श्वभे॑षजीः ।
गौ॒री मि॑माय सलि॒लानि॒ तक्ष॒त्येक॑पदी द्वि॒पदी॒ सा चतु॑ष्पदी ।
अ॒ष्टाप॑दी नव॑पदी बभू॒वुषी॑ स॒हस्रा॑क्षरा पर॒मे व्यो॑मन् ।
ॐ अधिदेवता प्रत्यधिदेवता सहिताय सोमा॑य॒ नम॑ः ॥ २ ॥

ॐ अग्निर्मूर्द्धा दिवः ककुत्पतिः पृथिव्या अयम्।
अपाꣳ रेताꣳसि जिन्वति।
स्योना पृथिवि भवाऽनृक्षरा निवेशनि। यच्छानश्शर्म सप्रथाः।
क्षेत्रस्य पतिना वयꣳहितो नेव जयामसि।
गामश्वं पोषयिन्त्वा स नो मृडातीदृशे ॥
ॐ अधिदेवता प्रत्यधिदेवता सहिताय अङ्गारकाय नमः ॥ ३॥

ॐ उद्बुध्यस्वाग्ने प्रतिजागृह्येनमिष्टापूर्ते सꣳसृजेथामयञ्च।
पुनः कृण्वꣳस्त्वा पितरं युवानमन्वाअꣳसीत्वयि तन्तुमेतम् ॥
इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्। समूढमस्यपाꣳ सुरे ॥
विष्णो रराटमसि विष्णोः पृष्ठमसि विष्णोश्श्नप्त्रेस्थो
विष्णोस्स्यूरसि विष्णोर्ध्रुवमसि वैष्णवमसि विष्णवे त्वा।
ॐ अधिदेवता प्रत्यधिदेवता सहिताय बुधाय नमः ॥ ४॥

ॐ बृहस्पते अतियदर्यो अर्हाद्द्युमद्विभाति क्रतुमज्जनेषु।
यद्दिदयच्चवसर्तप्रजात तदस्मासु द्रविणन्धेहि चित्रम् ॥
इन्द्रमरुत्व इह पाहि सोमं यथा शार्याते अपिबस्सुतस्य।
तव प्रणीती तव शूरशर्मन्नाविवासन्ति कवयस्सुयज्ञाः ॥
ब्रह्मजज्ञानं प्रथमं पुरस्ताद्विसीमतस्सुरुचो वेन आवः।
सबुध्निया उपमा अस्य विष्ठास्सतश्च योनिमसतश्च विवः
ॐ अधिदेवता प्रत्यधिदेवता सहिताय बृहस्पतये नमः ॥ ५॥

ॐ प्रवश्शुक्राय भानवे भरध्वम्। हव्यं मतिं चाग्नये सुपूतम् ॥
यो दैव्यानि मानुषा जनूꣳषि। अन्तर्विश्वानि विद्म ना जिगाति ॥
इन्द्राणीमासु नारिषु सुपत्नीमहमश्रवम्।
न ह्यस्या अपरंचन जरसा मरते पतिः ॥
इन्द्रं वो विश्वतस्परि हवामहे जनेभ्यः। अस्माकमस्तु केवलः ॥
ॐ अधिदेवता प्रत्यधिदेवता सहिताय शुक्राय नमः ॥ ६॥

ॐ शन्नो देवीरभिष्टय आपो भवन्तु पीतये। शंयोरभिस्रवन्तु नः ॥
प्रजापते न त्वदेतन्यन्यो विश्वा जातानि परिता बभूव।
यत्कामास्ते जुहुमास्तन्नो अस्तु वयꣳस्याम पतयो रयीणाम्।
इमं यमप्रस्तरमाहि सीदाऽङ्गिरोभिः पितृभिस्संविदानः।
आत्वा मन्त्राः कविशस्ता वहन्त्वेना राजन् हविषा मादयस्व॥
ॐ अधिदेवता प्रत्यधिदेवता सहिताय शनैश्चराय नमः ॥ ७॥

ॐ कया नश्चित्र आभुवदूती सदावृधस्सखा ।
कया शचिष्ठया वृता ।
आऽयङ्गौः पृश्निरक्रमीदसनन्मातरं पुनः । पितरञ्च प्रयन्त्सुवः ।
यत्ते देवी निरृतिराबबन्ध दाम ग्रीवास्वविचर्त्यम् ।
इदन्ते तद्विष्याम्यायुषो न मध्यादथाजीवः पितुमद्धि प्रमुक्तः ॥
ॐ अधिदेवता प्रत्यधिदेवता सहिताय रहवे नमः ॥ ८ ॥

ॐ केतुङ्कृण्वन्नकेतवे पेशो मर्या अपेशसे । समुषद्भिरजायथा ॥
ब्रह्मा देवानां पदवीः कवीनामृषिर्विप्राणां महिषो मृगाणाम् ।
श्येनोगृध्राणाꣳस्वधितिर्वनानाꣳ सोमः पवित्रमत्येति रेभन् ।
सचित्र चित्रं चितयन्तमस्मे चित्रक्षत्र चित्रतमं वयोधाम् ।
चन्द्रं रयिं पुरुवीरम् बृहन्तं चन्द्रचन्द्राभिर्गृणते युवस्व ॥
ॐ अधिदेवता प्रत्यधिदेवता सहितेभ्यः केतुभ्यो नमः ॥ ९ ॥

॥ ॐ आदित्यादि नवग्रह देवताभ्यो नमो नमः ॥
॥ ॐ शान्तिः शान्तिः शान्तिः ॥

Encoded with Accents by Rajagopal Iyer rajsand@yahoo.com

Please send corrections to sanskrit@cheerful.com
Last updated July 7, 2004